Postal Regd.No. GAMC- 1553/2022-2024 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १८ अङ्क : २१०
नवेम्बर - २०२३

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### मोघं पार्थ स जीवति

अन्तर्जालस्य युगे वयं जीवामः। गृहे वा आश्रमे वा, विद्यालये वा द्यूतालये वा, अन्तर्जालस्य उपस्थितिः अनिवार्या। तेन विना राष्ट्रस्य समग्रं तन्त्रं नश्यति। दूरवाण्याः प्रारभ्य चन्द्रयानं यावत्, अन्तर्जालं परोपकारी सज्जनः इव सर्वत्र अस्माभिः सह तिष्ठति। तत्र काचित् क्षतिः जायते चेत् व्यवहाराः अपि सद्यः हन्यन्ते। राष्ट्रस्य आन्तरकार्याणां दृढीकरणे तन्त्रं यथाशक्ति प्रयतते। तन्त्रम् अर्थात् सूत्रम्, पद्धतिः, अविच्छिन्ना परम्परा, सिद्धान्तः, नियमः, शास्त्रम्, प्रशासनम्।

एतत् तन्त्रं सर्वत्र रक्षणीयम्। अस्माकं शरीरं तस्य उदाहरणाय अलम्। शरीरे पाचनतन्त्रम्, उत्सर्गतन्त्रम्, श्वसनतन्त्रम्, रुधिराभिसरणतन्त्रम् इति नैकानि तन्त्राणि निरन्तरं प्रवर्तन्ते। ततः एव वयं जीवामः। तन्त्रे अपि बहूनि उपतन्त्राणि (सब सिस्टम) वर्तन्ते। तेषाम् अपि परस्परं संवादः – लयः वर्तते। भगवद्गीतायाम् एतस्य समूहस्य नाम अस्ति – इन्द्रियग्रामः।

धरातलम् अवतीर्णः प्रत्येकं मनुष्यः सुखी भवितुम् इच्छति। सुखदुःखयोः विवेकं वाक्यद्वयेन कर्तुं शक्यते –

१. सुखम् अर्थात् तन्त्रस्य रक्षणम्। २. दुःखम् अर्थात् तन्त्रस्य विनाशः।

परमात्मना प्रवर्तितं तन्त्रं सुष्ठु प्रचलति। ग्रहाः नियतं भ्रमन्ति। ऋतवः स्वकर्मणि प्रवर्तन्ते। पर्जन्यः यथाकालं वर्षति। परन्तु मनुष्यः सृष्टेः तन्त्रे विघ्नं जनयति। कश्चित् वनवासी केवलम् इन्धनार्थं वृक्षस्य छेदनं करोति चेत् वनं न नश्यति। वने नूतनाः वृक्षाः रोहन्ति एव। परन्तु कश्चित् धनलुब्धः वनाधिकारी महता प्रमाणेन काष्ठानि चोरयति तदा वनं नश्यति। अथवा वनस्य तन्त्रं नश्यति। परिणामतः अवग्रहः (वृष्टेः अभावः), अतिवृष्टिः, प्रदूषणं वा आपतन्ति। एवं नष्टे तन्त्रे सर्वे सजीवाः दुःखं प्राप्नुवन्ति।

यज्ञस्य आवश्यकता अत्र वर्तते। यज्ञकर्म अर्थात् सृष्टेः तन्त्रस्य संरक्षणम्। यथा देहतन्त्रं निर्बाधं प्रवर्तेत इति अपेक्षा भवति, तथैव सृष्टिं प्रति चिन्तयितुं शक्यते। श्रीभगवान् एवम् उवाच –

**एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः।**
**अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥**

## सज्जनानां सहवासः

कश्चन ग्रामः। तत्र स्थितेषु आढ्येषु भूषणोऽपि अन्यतमः। तस्य गृहम् अतीव विशालम्। चत्वारः भ्रातरः तस्मिन् गृहे निवसन्ति। प्रतिदिनमपि सायं गृहस्य, पार्श्वगृहस्य च बालकाः तत्र आगत्य क्रीडन्तः महान्तं कोलाहलं कुर्वन्ति स्म।

कदाचित् सूर्यस्य अस्तमनवेलायां कश्चन शकटः आगत्य भूषणस्य गृहस्य पुरतः स्थितः। शकटे कः अस्ति इति द्रष्टुं सर्वे बालकाः उत्सुकाः। तावता देहल्याम् उपविष्टौ भूषणः तस्य अग्रजश्च उत्थाय शकटसमीपं गतौ। शकटात् अवतरन्तीं काञ्चन वृद्धां दृष्ट्वा – ''अम्ब ! कथमस्ति भवती ? कुशलिनी किल ? इति पृष्टवन्तौ।''

तां वृद्धां दृष्टवतां बालानां मुखेषु सन्तोषस्य चिह्नानि दृष्टानि। ते उच्चस्वरेण – ''पितामही आगता। पितामही आगता'' इति वदन्तः तां वृद्धां परितः स्थिताः।

सा वृद्धा भूषणस्य पितृव्या सावित्री। सा अस्मात् ग्रामात् किञ्चिद्दूरे निवसति। भूषणस्य, तद्गृहसदस्यानां च विषये तस्याः महती प्रीतिः। सा आगता चेत् गृहे स्थिताः सर्वे बालाः तस्याः कथाश्रवणे एव निमग्नाः सन्तः भोजनादिकमपि विस्मरन्ति स्म।

रात्रिः जाता। सर्वेषां भोजनं समाप्तम्। सर्वे एकत्र उपविष्टाः। पितामही भूषणस्य कनिष्ठं पुत्रं पश्यन्ती पृष्टवती – ''गोपाल ! हस्ते पट्टिका दृश्यते किल ? किम् अभवत् ?'' इति।

गोपालः किमपि वक्तुं यावत् उद्युक्तः तावता भूषणस्य पत्नी पुत्रम् आक्षिपन्ती उक्तवती – ''मातः ! एषः शालायां दुष्टानां बालकानां मैत्रीं कृतवान्। ते तु विना कारणं परस्परं कलहं कुर्वन्ति। तादृशे कलहे एषः व्रणितः अभवत्'' इति।

तदा तं गोपालम् अङ्के आरोपयन्ती सा वृद्धा – ''एषोऽपि दुष्टः एव स्यात्। दुष्टः एव दुष्टस्य मैत्रीं करोति'' इति उक्त्वा गोपालम् उद्दिश्य – ''गोपाल ! शृणोतु। सज्जनानां सहवासः एव सर्वेषु उत्तमः। अतः योग्यानां जनानाम् एव मैत्री करणीया। सज्जनानां सहवासेन कीदृशं फलं जायते इति ज्ञापयितुं कथामेकां कथयामि। सश्रद्धं शृणोतु'' इति उक्त्वा कथाम् आरब्धवती –

पुरातनी कथा एषा। रामपुरनामके ग्रामे कश्चन भूस्वामी निवसति स्म। सः अतीव दयालुः धर्मिष्ठः च। तस्य पुत्रः श्रीकान्तः। सोऽपि पितृसदृशः एव। नितरां सज्जनः सः। अन्यैः सह तस्य व्यवहारः अत्यन्तं मृदुः आसीत्। अतः जनाः अपि तं प्रशंसन्ति स्म।

तस्मिन् एव ग्रामे कश्चन कृषिकः राजीवनामकः आसीत्। तस्य पुत्रस्य नाम सोमदेवः इति। सः सोमदेवः स्वभावेन दुष्टः, किन्तु पठने तस्य महती अभिरुचिः। अतः राजीवः स्वपुत्रं तस्मिन् ग्रामे स्थितस्य नारायणत्रिवेदिनामकस्य अध्यापकस्य समीपं पठनार्थं प्रेषितवान्।

सोमदेवः इव श्रीकान्तः अपि तस्य अध्यापकस्य सकाशात् एव पठति स्म। श्रीकान्तः सोमदेवेन सह महता आदरेणैव व्यवहरति स्म। मधुरेण स्वरेण सम्भाषणं करोति स्म। किन्तु सोमदेवस्य व्यवहारः तु सर्वथा विरुद्धः एव। सः श्रीकान्तं न गणयति स्म। सर्वदा गर्वव्यवहारः तस्य।

केषुचित् दिनेषु उभयोः अपि विद्या समाप्ता। श्रीकान्तः इतोऽपि अध्ययनं करणीयमिति मनीषया ग्रामात् दूरे स्थितायां भूस्वामिनः शालायां पठनम् आरब्धवान्। राजीवः स्वपुत्रमपि श्रीकान्तेन सह प्रेषयितुम् इष्टवान्। श्रीकान्तः येन यानेन गच्छति तेनैव यानेन पुत्रस्य प्रेषणाय व्यवस्थां कृतवान् च।

कदाचित् सोमदेवः सहपाठिनं भू-स्वामिनः पुत्रं शङ्करं पाषाणेन ताडितवान्। तेन व्रणितः अभवत् शङ्करः। एषा वार्ता शालायां सर्वत्र प्रसृता।

मुख्योपाध्यायः विष्णुशर्मा वैद्यम् आनेतुं कश्चन सम्प्रेष्य शङ्करस्य व्रणितं भागं वस्त्रेण बद्धवान्। 'पाषाणं कः क्षिप्तवान्?' इति कोपेन पृष्टवान् च।

एतत् श्रुतवतः सोमदेवस्य देहे कम्पनम् आरब्धम्। तावता द्वित्राः बालाः सोमदेवं दर्शितवन्तः। एतत् श्रुत्वा आश्चर्यचकितः सन् विष्णुशर्मा पृष्टवान् - "एषः सोमदेवः श्रीकान्तस्य मित्रम् । एषः तादृशं कार्यं कथं कर्तुम् अर्हेत्?" इति।

गुरोः वचनं श्रुत्वा सोमदेवस्य नेत्रे अश्रुपूर्णे। तेन इदानीम् अवगतं यत् स्वस्मिन् कियती दुष्टता अस्ति, श्रीकान्ते च कियत् सौजन्यम् अस्ति इति। स्वस्य दुष्टताविषये बहुधा पश्चात्तापम् अनुभूतवान् सः।

विष्णुशर्मा सोमदेवस्य अवस्थां पश्यन् तान् बालकान् उक्तवान् - "पश्यन्तु। मया किमपि न भर्त्सितम्। तथापि सोमदेवः महत् दुःखम् अनुभवन् अस्ति। एतादृशः तादृशं नीचं कार्यं कथं कुर्यात्? इतः परं सज्जनेषु दोषारोपणं न कुर्वन्तु" इति।

तदा शङ्करोऽपि स्नेहपूर्णया दृष्ट्या सोमदेवं पश्यन् उक्तवान् - "सोमदेवः न केवलं श्रीकान्तस्य, अपि तु ममापि मित्रम् एव। एषः दुष्टं कार्यं कर्तुं न अर्हति" इति।

एतत् श्रुत्वा सोमदेवः स्तब्धः अभवत्। तस्य मुखात् एकः अपि शब्दः न निःसृतः। क्षणाभ्यन्तरे जागरितः सः विष्णुशर्मणः समीपं गत्वा शिरः अवनमय्य उक्तवान् - "गुरुवर्य! शङ्करं पाषाणेन अहमेव ताडितवान्। शङ्करश्रीकान्तौ गुणशालिनौ। अत एव तौ मां दोषरहितं भावयतः" इति।

सोमदेवस्य पश्चात्तापयुक्तं वचनं श्रुत्वा विष्णुशर्मा किमपि वक्तुम् उद्युक्तः। तदा शङ्करः श्रीकान्तश्च - "गुरुवर्य! आवां जानीवः एव यत् सोमदेवः एव पाषाणं क्षिप्तवान् इति। किन्तु तस्य पश्चात्तापयुक्तं व्यवहारं पश्यतोः आवयोः तस्य विषये दया उत्पन्ना। अतः आवां तं निर्दोषिणम् उक्तवन्तौ। कृपया सोमदेवं मा दण्डयतु" इति।

विष्णुशर्मा तयोः उदारतां दृष्ट्वा सन्तुष्टः सन् सोमदेवम् उक्तवान् - "पश्यतु, सोमदेव! भवता सज्जनसहवासः प्राप्तः अस्ति। भवान् निश्चयेन भाग्यवान्" इति।

पितामही कथां समाप्य उक्तवती - "वत्साः! सज्जनसहवासः कीदृशफलदायकः इति भवद्भिः ज्ञातमिति मन्ये"। तदा बालकाः सर्वे सन्तोषेण अवदन् - "आम्। सम्यक् ज्ञातम्। इतः परं वयम् उत्तमानाम् एव मैत्रीं करिष्यामः" इति।

## पञ्चरात्रम् ( ग्रन्थपरिचयः )

व्योम शाहः

(अनुवर्तते)

महाकविभासप्रणीते पञ्चरात्रे एतावता अस्माभिः दृष्टं यत् दुर्योधनेन कृतः यज्ञः सम्पन्नः । सः विराटस्य अनुपस्थितिं ज्ञात्वा तं प्रति दूतं प्रेषयति। दुर्योधनेन पृष्टः द्रोणाचार्यः पाण्डवैः सह राज्यस्य विभागं कर्तुं दक्षिणारूपेण ज्ञापयति। कर्ण-शकुनिभ्यां दुर्योधनः चर्चां करोति। मन्त्रणानन्तरम् इत्थं निश्चितं भवति यत् - पञ्चसु रात्रिषु यदि अज्ञातवासस्थितानां पाण्डवानां प्रवृत्तिः ज्ञायते, तर्हि तेभ्यः राज्यार्धं दीयते। द्रोणः एतत् श्रुत्वा खिन्नः।

एतत् श्रुत्वा द्रोणः खिन्नः। अस्माद् विकल्पात् तु वरस्य न दानम् एव योग्यम् इति अचिन्तयत्। कारणं तु -

**''ये कर्तुकामैच्छलनं भवद्भि : संवत्सरैः द्वादशभिर्न दृष्टाः ।**

**ते पञ्चरात्रेण मयोपनेया वरं ह्यदत्तं विशदाक्षरेण ॥**

अस्मिन्नवसरे विराटनगराय प्रेषितः दूतः प्रत्यागतः । तेन निवेदितं यत् कीचकानां भ्रातृशतस्य केनचित् अशस्त्रेण वधः कृतः । भीष्मः द्रोणाय निवेदयति यदयं भीमसेनस्य एव पराक्रमः । सर्वेऽपि योद्धुकामाः विराटनगरार्थं निर्गच्छन्ति।


द्वितीयाङ्कस्य प्रवेशके ज्ञाप्यते यत् धृतराष्ट्रपुत्राः सर्वेऽपि मिलित्वा विराटनगरे धेनूः हरन्ति। भटः इमं वृत्तान्तं कञ्चुकीयाय विराटेश्वराय च निवेदयति । विराटेश्वरः भटं युद्धार्थं सज्जतां कर्तुमाज्ञापयति । ब्राह्मणरूपधारी युधिष्ठिरः राजसभायाम् आहूतः। विराटः गोग्रहणेन उद्भूताम् अवमानिततां प्रकटीकरोति। तदैव युद्धवार्तां गृहीत्वा भटः प्रविशति निवेदयति च यत् न केवलं दुर्योधनः किन्तु द्रोणः, भीष्मः, जयद्रथः, शल्यः, कर्णः, शकुनिः, कृपः चेति प्राप्ताः । भीष्मस्य आगमनं श्रुत्वा विराटः चकितः । सः रथम् आनेतुमादिशति किन्तु उत्तरः स्वयं तेन रथेन रणं गतः । विराटः सूताय कुप्यति किन्तु सोऽपि स्वीयां निरपराधितां प्रकटीकुर्वन् कथयति यत् बृहन्नला तं सूतम् अतिक्रम्य स्वयं सारथिः अभवत् । ब्राह्मणवेषधारी युधिष्ठिरः कथयति यत् सः बृहन्नलया ऊढः रथः निश्चयेन जेष्यतीति । भटोऽपि आगत्य तादृशीमेव सङ्गरस्थितिं वर्णयति। रणे सर्वेऽपि धुरन्धराः योधाः भीताः । एकः एव अभिमन्युः निर्भयः सन् युध्यते। इदानीं तेन उत्तरेण सर्वेऽपि योधाः वारिताः । बृहन्नलया सह च स राजसभां प्राप्तः । बृहन्नला रणविस्तरं निवेदयति। तदैव विस्मितः भटः कथयति यत् महानसे नियुक्तेन (भीमसेनेन) सुभद्रापुत्रः अभिमन्युः गृहीतः । राजा तं प्रवेशयितुं बृहन्नलाम् आवेदयति । अभिमन्युः अतीव रुष्टः । भीमसेनेन वारितोऽपि न प्रसीदति । बृहन्नला तेन अभिभाषितुम् आरभते। बृहन्नला सुभद्रायाः केशवस्य च कुशलवार्तां पृच्छति। एतत् श्रुत्वा अभिमन्युः अधिकं रुष्टः।


बृहन्नला पृच्छति यत् कथङ्कारं स पदातिना एव गृहीतः ? सः कथयति यत् सः (भीमसेनः) शस्त्रेण विना आगतः, अतः सः न तेन हतः यतो हि सः (अभिमन्युः) अर्जुनस्य पुत्रः । ततः ते राजसभां प्रविष्टाः । विराटः तं सान्त्वयति। शीघ्रमेव अभिमन्युः अनुमिनोति यदिमौ तस्य पितृव्यौ बृहन्नला च पिता। तदैव उत्तरः तत्र आगत्य सर्वेषां गोपायितानां पाण्डवानां परिचयं कारयति। विराटः इदं वचः श्रुत्वा आश्चर्यं हर्षं च प्राप्तवान्। विराटः स्वयां पुत्रीम् उत्तराम् अर्जुनाय दातुमिच्छति । अर्जुनेन उक्तं यत् समस्तम् अन्तःपुरं तेन मातृवत् पूजितम्, अतः स्वयं न ग्रहीतुं शक्नोति स्वस्य कृते। सः तां पुत्राय अभिमन्यवे प्रतिगृह्णाति।

(क्रमशः... )

## मासवार्ता:

### सम्पन्नः संस्कृतगरबाकार्यक्रमः





एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं नवरात्रे संस्कृतगरबाकार्यक्रमस्य आयोजनं करोति । एतस्मिन् वर्षेऽपि ऑक्टोबरमासस्य १५ दिनाङ्के सम्पन्नः भव्यः संस्कृतगरबाकार्यक्रमः । संस्कृतभाषायाः प्रचाराय आयोजितेऽस्मिन् विशिष्टे कार्यक्रमे नवशताधिकाः संस्कृतरसिकाः सोत्साहं संस्कृतगरबायाः आनन्दम् अन्वभवन् । परिश्रमेण आयोजितेऽस्मिन् संस्कृतगरबाकार्यक्रमे मातुः नीराजनतः आरभ्य द्वितालगरबा, त्रितालगरबा, भाङ्गडा इत्यादीनि ५० गीतानि प्रस्तुतानि । श्रीधवलकुमारस्य धैर्या मांकडस्य च मार्गदर्शने अर्चना पटेलः, श्रीमती भावना रावलः, पारुल व्यासः, श्रीमती माधवी झाला, श्री जतीनः पटेलः, श्री रुद्रेशः त्रिवेदी, श्रीमती नवधा जुनेजा, हनी रावलः च सवाद्यं सुमधुराणि गरबागीतानि अगायन् । अत्र उल्लेखनीयं यत् संस्कृतभाषायाः प्रचाराय ऑक्टोबरमासस्य २४ दिनाङ्के संस्कृतविद्याप्रतिष्ठानम्, अमदावाद-संस्कृत-एकेडेमी च इत्यनयोः संयुक्तोपक्रमेण 'माङ्गल्यवाटिकापार्टिप्लोट' इति स्थाने अपरः भव्यः संस्कृतगरबाकार्यक्रमः सम्पन्नः । कार्यक्रमेऽस्मिन् १५०० जनाः भागम् अवहन् । उभौ अपि कार्यक्रमौ सफलौ ।

## कृपया हसन्तु

**रमण: - (नमनं प्रति) ह्य: अहम् एकं रोकेटस्फोटकं स्फोटितवान् तत् च सूर्येण सह घट्टितम् ।**

**नमन: - (साश्चर्यम्) तत: किं जातम् ?**

**रमण: - तत: मम ताडनम् अभवत्, अन्यत् किम् ?**

**नमन: - क: ताडितवान् ?**

**रमण: - भो: सूर्यस्य माता मां ताडितवती । सूर्य: मम प्रतिवेशी अस्ति ।**

★ ★ ★ ★ ★

**नमन: - (रमणम् उद्दिश्य) 'दीपावलीदिनेषु अहं किञ्चिदपि शीतपेयं न पास्यामि' इति त्वया वचनं दत्तम् आसीत् खलु ?**

**रमण: - आम्... आम्.... उक्तम् आसीत् ।**

**नमन: - तर्हि किमर्थं पिबसि ?**

**रमण: - भो: रोकेटस्फोटकं स्फोटयितुं रिक्ता कूपी आवश्यकी खलु ।**

## सुभाषितम्

**- संस्कृतविकिपीडियाजालस्थानात्**

**पादपानां भयं वातात् पद्मानां शिशिराद्भयम् ।**
**पर्वतानां भयं वज्रात् साधूनां दुर्जनाद्भयम् ॥**

**तात्पर्यम्** – दृढमूला: अपि वृक्षा: वेगयुक्तस्य वायो: कारणत: पतनं प्राप्तुम् अर्हन्ति । अत: वृक्षाणां वायुत: भयम् अस्ति । यदि हिमपात: भवति तर्हि कमलं नष्टं भविष्यति । शिशिर–ऋतौ हिमपात: भवति खलु ? अत: कमलानि शिशिर–ऋतुत: भीतानि भवन्ति । पूर्वं पर्वतानां पक्षा: आसन् इति, इन्द्र: तान् पक्षान् कर्तितवान् इति च कथा श्रूयते । अत: वज्रायुधत: पर्वतानां भीति: । सज्जना: यद्यपि यस्य कस्यापि अहितं न आचरन्ति, तथापि परपीडनस्वभावयुक्ता: दुष्टा: विना कारणम् अपि सज्जनान् पीडयितुम् अर्हन्ति । अत: सज्जना: दुष्टजनेभ्य: भीता: भवन्ति । एवं लोके एकैकस्यापि एकैकविधं भयं भवति एव ।

**पिबन्ति नद्य: स्वयमेव नाम्भ: स्वयं न खादन्ति फलानि वृक्षा: ।**
**नादन्ति सस्यं खलु वारिवाहा: परोपकाराय सतां विभूतय: ॥**

**तात्पर्यम्** – नदीषु जलं भवति । परन्तु नद्य: स्वयमेव तत् जलं कदापि न पिबन्ति । वृक्षेषु फलानि भवन्ति । ते वृक्षा: अपि स्वयमेव तानि फलानि कदापि न खादन्ति । जलवर्षणेन सस्यानि यथा सम्यक् प्रवृद्धानि भवेयु: तथा कुर्वन्ति मेघा: । परन्तु ते स्वेन वर्धितानि सस्यानि न खादन्ति । तथैव सज्जनानां सर्वा: सम्पत्तय: परोपकाराय एव भवन्ति ।

## ज्ञानसरित्

**श्यामः पटेलः**

**प्रतिदिनम् उपयुज्यमानः दर्पणः ।** अस्माकं दैनन्दिनजीवने दर्पणस्य आवश्यकता स्वतः सिद्धा अस्ति। प्रातरुत्थाय शयनपर्यन्तं नैकेषु कार्येषु दर्पणस्य उपयोगिता अस्ति। अतः अद्य दर्पणस्य इतिहासं तथा च तस्य विषये किञ्चित् विशेषं ज्ञातुं यतामहे।

आदिकाले यदा दर्पणः न आसीत् तदा मनुष्यः जलाशये वा जलभरितपात्रे स्वकीयं प्रतिबिम्बम् अवलोक्य विस्मितः भवति स्म। वस्तुतः काचः तु तदाऽपि प्रयोगे आसीत्। यतो हि ज्वालामुखिपर्वतात् निर्गच्छन् अग्निमयद्रवः भूमौ प्रसारितः भवति। तदा सः द्रवः शीतः भूत्वा कदाचित् कुत्रचित् च पारदर्शि-काचरूपेण प्राप्यते। तादृशस्य काचस्य तदाऽपि उपयोगः भवति स्म इति नैकेषु स्थानेषु उल्लिखितम् अस्ति। परन्तु कृत्रिमरूपेण काचस्य निर्माणं तु १६ शताब्द्याः एव प्रारब्धम् अस्ति। ततः पूर्वं काचस्य स्थाने सुवर्णस्य रजतस्य ताम्रस्य कांस्यस्य वा स्फटिकप्रभं फलकं दर्पणरूपेण उपयुज्यमानम् आसीत्। तदनन्तरं काचस्य पृष्ठभागे सुवर्णस्य रजतस्य वा आस्तरणं प्रयुज्य दर्पणनिर्माणं कुर्वन्ति स्म जनाः। अधुना पारदस्य भस्मनः आस्तरणेन दर्पणः भवति।

सम्प्रति आत्मानम् अवलोकितुं, वाहनेषु 'रिअरव्यु-मिरर' -रूपेण, वस्त्रेषु 'आभला' -रूपेण शोभावर्धनाय दर्पणस्य प्रयोगः प्रचलितः। भव्यभवनस्य मन्दिरस्य च निर्माणेऽपि दर्पणस्य विशेषः उपयोगः आरब्धः। विज्ञानक्षेत्रे तु ओप्टिकलटेलिस्कोप-बायनोक्युलर-पेरिस्कोप-प्रभृतिषु यन्त्रेषु सर्वाधिकोपयोगः। ऐन्द्रजालिकानां मायाप्रदर्शने तथा च चलचित्राणां मुद्रणावसरे वा केमेरा-यन्त्रे महान् उपकारी भवति दर्पणः। दर्पणस्य केन्द्रीयभागः यदा बहिर्गतः भवति तदा तस्मिन् दर्पणे दूरस्थानि वस्तुनि अपि द्रष्टुं शक्यते। किन्तु तस्य प्रतिबिम्बं लघु भवति। प्रत्युत मध्यभागः अन्तर्गतः भवति तदा समीपस्थं बिम्बं बृहत् प्रतिभाति। भवतु, इत्यलं विस्तरेण।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **नितान्तः** | असाधारण | extraordinary |
| **रोषः** | रोष | rage |
| **सहस्रकिरणः** | सूर्य | sun |
| **शङ्खः** | शंख | conch sheel |
| **सङ्गरः** | युद्ध | war |
| **एकलः** | एकाकी | alone |
| **पराङ्गवः** | समुद्र | ocean |
| **परीष्टिः** | अन्वेषणा | research |
| **परुत्** | गत वर्ष | last year |
| **परेतः** | मृत | dead |
| **गुणोत्कर्षः** | गुणों का अतिशय | excellence |
| **त्विषा** | दीप्ति | brilliance |
| **आश्लेषः** | आलिङ्गन | embrace |
| **खरः** | गर्दभ | donkey |
| **उदधानः** | मेघ | rainy clouds |

## किं भवन्तः जानन्ति ?

**१ ) प्रसिद्धस्य साँचीस्तूपस्य रचना केन कृता आसीत् ?**
(क) चन्द्रगुप्तेन (ख) बिम्बिसारेण (ग) अशोकेन (घ) अजातशत्रुणा

**२ ) भूदानान्दोलनस्य प्रणेता कः आसीत् ?**
(क) महात्मा गान्धिः (ख) स्वामिदयानन्दः (ग) निवेदिता (घ) विनोबाभावे

**३ ) नवरात्रोत्सवे कस्याः देव्याः पूजा भवति ?**
(क) लक्ष्म्याः (ख) दुर्गायाः (ग) पार्वत्याः(घ) सरस्वत्याः

**४ ) एतेषु कः देवः ताण्डवनृत्यम् अकरोत् ?**
(क) शिवः (ख) विष्णुः (ग) अग्निः (घ) इन्द्रः

**५ ) एतासु कस्याः गणना पञ्चकन्यासु भवति ?**
(क) कुन्त्याः (ख) सुलोचनायाः (ग) गान्धार्याः (घ) सुभद्रायाः

**६ ) सिक्खानां दशमः गुरुः कः आसीत् ?**
(क) अङ्गददेवः (ख) हरिरायः (ग) अर्जुनदेवः (घ) गोविन्दसिंहः

**७ ) कः जैनधर्मस्य प्रवर्तकः आसीत् ?**
(क) नानकः (ख) बुद्धः (ग) अम्बेडकरः (घ) महावीरः

उत्तराणि – (१) ग (२) घ (३) ख (४) क (५) क (६) घ (७) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

## दीपावलीवर्गः

**(17 Nov 2023 to 25 Nov 2023)**

### संस्कृतव्याकरणम्

(Class 9-10)

8am to 9:30am

3000/-

### बालसंस्कृतवर्गः

(Class 1 to 8)

10am to 11:30am

2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY

**Online / Offline**

**Admission Open**

## संस्कृतभाषाशिक्षणम्

### First Level

**Date :** 03/01/24 to 29/03/23
**Day :** Mon-Wed-Fri
**Time :** 7:00am to 8:30am
**Fees :** 6000/-

### Third Level

**Date :** 03/01/24 to 29/03/24
**Day :** Mon-Wed-Fri
**Time :** 6:30pm to 8:00pm
**Fees :** 6000/-

संस्कृत-
**साम्प्रतम्**

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |





**सर्वेभ्यः पाठकेभ्यः**
**दीपावल्याः शुभकामनाः**
**नूतनवर्षाभिनन्दनानि च ।**

**- सम्पादकः**

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006